पितरमनादृत्य उल्लङ्घ्येत्यर्थः। प्रथमविवाहे एव पितुरधिकारः द्वितीये तु स्वस्यैवेति भेदः।“नान्दीश्राद्धं पिता कुर्य्यात् आद्ये पाणिग्रहे बुध!। अत ऊर्द्धं प्रकुर्व्वीत स्वयमेव तु नान्दिकम्”नि०सि० धृतस्मृतेः। छन्दोग० वाक्ये तदभावे तस्य पितुरभावे तत्क्रमात्“असंस्कृतास्तु संस्कार्य्या भ्रातृभिः पूर्व्वसंस्कृतैरिति”या०यः कर्त्तृक्रमः तेन क्रमेण ज्येष्ठभ्राता दद्यात् इति पृथ्वीचन्द्रोदयः। हेमाद्रिस्तु पितुरभावे यः पितृव्यमातुलादिः संस्कुर्य्यात् स तत्क्रमात् संस्कार्य्यपितृक्रमात् न तु स्वपितृभ्य इति व्याचख्यौ। तेन अमुकस्येति संस्कार्य्यनामाभिधाय पितुरिति प्रयोज्यमेवमेव रघुनन्दनादयः। “वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति। येभ्य एव पिता दद्यात् तेभ्यो दद्यात् स्वयं सुतः। कात्या० स्मृतेः जीवत्पितृकस्य तीर्थादौ विशेषः पितरि संन्यस्ते प्रोषिते पतिते वा यदाऽन्यस्तत्पुत्रं धर्म्मबुद्ध्या संस्कुर्य्यात् तदा संस्कार्य्यपितुः पित्रादिभ्यो दद्यात् न संस्कार्य्यपित्रादिभ्यः निर्ण० सि०। एवं जीवन्मातृकेणापि मातरमतिक्रम्य पितामह्यादीनां तिसृणाम् श्राद्धं छन्दोगेतरेण करणीयमिति “योयो जीवति तमति दद्यादिति” स्मृतौ पुंस्त्वस्याविवक्षितत्वात्। पित्रादित्रिकस्य जीवने तु तद्वर्गश्राद्धनिवृत्तिः किन्तु जीवद्भिरेव तैः तच्छ्राद्धं भोज्यं “पितामहो वा तत्श्राद्धं स्वयं भुञ्जीतेति”मनुवचनात्। एवं मात्रादित्रयेऽपि बोध्यम् तेन जीवद्वर्गपरित्यागेनेतरवर्गश्राद्धं करणीयम् “यदि जीवति वर्गस्तु तं वर्गं तु परित्यजेत्” नि०सि० वचनात्।

**आभ्रिक** त्रि० अभ्र्या खनति ठक्। काष्ठकुद्दालेन खनके।

**आभ्र** त्रि० अभ्रे आकाशे भवः कुर्व्वा० ण्य। आकाशभवे।

**आम्** अव्य० अम—गत्यादिषु णिच्—वा अह्रस्वः क्विप्। १अङ्गीकारे २निश्चये ज्ञाने ३ स्मृतौ ४प्रतिवचने च।

**आम** पु०। आम्यते ईषत्पच्यते आ+अम—कर्म्मणि घञ्। १ईषत्पक्वे असिद्धे २पाकरहिते। अम—करणे घञ्। ३रोगमात्रे। वैद्यकोक्ते षट्विधे अजीर्णे ४रोगभेदे च आमाटोपापचीश्लेष्मगुल्मक्रिमिविकारिणाम्” सुश्रु०। तल्लक्षणादि यथा निदा० “आहारस्य रसः सारः योन पक्वोऽग्निलाघवात्। आमसंज्ञां स लभते बहुव्याधिसमाश्रयः। आममन्नरसं केचित् केचित्तु मलसञ्चयम्। प्रथमदोषदुष्टिं वा वदन्ति बहुपिच्छिलाम्। सादनं सर्व्वगात्राणामाममित्यभिशब्दितम्” “तेनामेन सदा युक्ता दोषा दुष्याश्च तादृशाः। तदुद्भवा आमयाश्च सामा इति बुधैः स्मृताः” तेनास्य क्लीवत्वमपि। आमस्य निदानस्वरूपभेदादि निदाने उक्तम् “आमं विदग्धं विष्टब्धं तथा पित्तानिलैस्त्रिभिः। अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः। अजीर्णं पञ्चमं केचिन्निर्दोषं दिनपाकि च। वदन्ति षष्ठं चाजीर्णं प्राकृतं प्रतिवासरम्। तत्रामे गुरुतोत्क्लेदः शोथो गण्डाक्षिकूटकः। उद्गारश्च यथाभुक्तमविदग्धं प्रवर्त्तते”। तस्य चामनामत्वे कारणमप्युक्तम् तत्रैव। “भुक्तमन्नावशेषं यत् रसभूतन्त्वपाचितम्। गतमामाशये यस्मात्तस्मादामं प्रचक्षते इति।” अधिकमामाशयशब्दे वक्ष्यते।

अपाकरूपामात् तृष्णाधिक्यं जायते तदुक्तम् सुश्रु०। “तिस्रः स्मृतास्ताः क्षतजा चतुर्थी क्षयात्तथान्यामसमुद्भवा” च इत्यादिना सप्तविधास्तृष्णा विभज्य “त्रिदोषलिङ्गामसमुद्भवा च हृच्छूलनिष्ठीवनसादयुक्ता। स्निग्धं तथाम्लं लवणञ्च भुक्तं गुर्व्वन्नमेवातितृषीं करोति” आमस्यातिसाररोगादिहेतुत्वं सुश्रुते उक्तम् आमाजीर्णैः प्रद्रुताः क्षोभयन्तः कोष्ठं दोषाः संप्रदुष्टाः सभक्तम्। नानावर्णं नैकशः सारयन्ति कृच्छ्राज्जन्तोः षष्ठमेनं वदन्ति। संसृष्टमेभिर्दोषैस्तु मलमप्स्ववसीदति। पुरीषं भृशदुर्गन्धं पिच्छिलं चामसंज्ञितम्”इति आमातिसारं लक्षयित्वा। अतः सर्व्वातिसारास्तु ज्ञेयाः पक्वामलक्षणैः तत्र लङ्घनमेवादौ पूर्व्वरूपेषु देहिनाम्”। तत्र लङ्घनस्य कर्त्तव्यतामुक्त्वा अनेन विधिना चामं यस्य नैवोपशाम्यति। हरिद्रादिं वचादिं वा पिबेत् प्रातः स मानवः। आमातिसारिणां कार्य्यं नादौ संग्रहणं नृणा”मित्यनेन विशेष उक्तः तेन ४अतिसारभेदे “शस्यं क्षेत्रगतं प्राहुः सतुषं धान्यमुच्यते। आमं वितुषमित्युक्तम् स्विन्नमन्नमुदाहृतमिति” स्मृतिपरिभाषिते अपक्वे ५सतुषेऽन्ने च। “आमं शूद्रस्य पक्वान्नं पक्वमुच्छिष्टमुच्यते” स्मृतिः। आपद्यनग्नौ तीर्थे च चन्द्रसूर्य्यग्रहे तथा “आमश्राद्धं द्विजैः कार्य्यं शूद्रेण तु सदैव तु” प्रचे०। पाकस्य अग्निसंयोगात् कालवशात् वा वस्तुपरिणामविशेषः तत्राम्रादीनामामत्वमग्निविशेषसंयोगाभावात्। यथा आमान्नघटादेः। यद्यत् फलादि यद्यत्काले पच्यते तत्कालात् प्राक् तस्य पाकाभावे आमत्वम् यथाम्रादेः। तथा व्रणादेरपि परिपाकाभावे आमत्वम् कालिकम्। यथा “आमं विपच्यमानं च सम्यक् पक्वं च योभिषक्” व्रणपाकाभावे” सुश्रुतः।